श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टनवतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टनवतितमं दशकम् ॥

## निष्कलब्रह्मोपासना

यस्मिन्नेतद्विभातं यत इदमभवद्येन चेदं य एत -
    द्योऽस्मादुत्तीर्णरूपः खलु सकलमिदं भासितं यस्य भासा।
यो वाचां दूरदूरे पुनरपि मनसां यस्य देवा मुनीन्द्राः
    नो विद्युस्तत्त्वरूपं किमु पुनरपरे कृष्ण तस्मै नमस्ते ॥ **98.1** ॥

जन्माथो कर्म नाम स्फुटमिह गुणदोषादिकं वा न यस्मिन्
    लोकानामूतये यः स्वयमनुभजते तानि मायानुसारी।
बिभ्रच्छक्तीररूपोऽपि च बहुतररूपोऽवभात्यद्भुतात्मा
    तस्मै कैवल्यधाम्ने पररसपरिपूर्णाय विष्णो नमस्ते ॥ **98.2** ॥

नो तिर्यञ्चं न मर्त्यं न च सुरमसुरं न स्त्रियं नो पुमांसं
    न द्रव्यं कर्म जातिं गुणमपि सदसद्वापि ते रूपमाहुः।
शिष्टं यत् स्यान्निषेधे सति निगमशतैर्लक्षणावृत्तितस्तत्
    कृच्छ्रेणावेद्यमानं परमसुखमयं भाति तस्मै नमस्ते ॥ **98.3** ॥

मायायां बिम्बितस्त्वं सृजसि महदहङ्कारतन्मात्रभेदै -
    र्भूतग्रामेन्द्रियाद्यैरपि सकलजगत्स्वप्नसङ्कल्पकल्पम्।
भूयः संहृत्य सर्वं कमठ इव पदान्यात्मना कालशक्त्या
    गम्भीरे जायमाने तमसि वितिमिरो भासि तस्मै नमस्ते ॥ **98.4** ॥

शब्दब्रह्मेति कर्मेत्यणुरिति भगवन् काल इत्यालपन्ति
    त्वामेकं विश्वहेतुं सकलमयतया सर्वथा कल्प्यमानम्।

वेदान्तैर्यत्तु गीतं पुरुषपरचिदात्माभिधं तत्तु तत्त्वं
प्रेक्षामात्रेण मूलप्रकृतिविकृतिकृत् कृष्ण तस्मै नमस्ते ॥ **98.5** ॥

सत्त्वेनासत्तया वा न च खलु सदसत्त्वेन निर्वाच्यरूपा
धत्ते यासावविद्या गुणफणिमतिवद्विश्वदृश्यावभासम् ।
विद्यात्वं सैव याता श्रुतिवचनलवैर्यत्कृपास्यन्दलाभे
संसारारण्यसद्यस्त्रुटनपरशुतामेति तस्मै नमस्ते ॥ **98.6** ॥

भूषासु स्वर्णवद्वा जगति घटशरावादिके मृत्तिकाव -
त्तत्त्वे सञ्चिन्त्यमाने स्फुरति तदधुनाप्यद्वितीयं वपुस्ते ।
स्वप्नद्रष्टुः प्रबोधे तिमिरलयविधौ जीर्णरज्जोश्च यद्व -
द्विद्यालाभे तथैव स्फुटमपि विकसेत् कृष्ण तस्मै नमस्ते ॥ **98.7** ॥

यद्भीत्योदेति सूर्यो दहति च दहनो वाति वायुस्तथान्ये
यद्भीताः पद्मजाद्याः पुनरुचितबलीनाहरन्तेऽनुकालम् ।
येनैवारोपिताः प्राङ्निजपदमपि ते च्यावितारश्च पश्चा -
त्तस्मै विश्वं नियन्त्रे वयमपि भवते कृष्ण कुर्मः प्रणामम् ॥ **98.8** ॥

त्रैलोक्यं भावयन्तं त्रिगुणमयमिदं त्र्यक्षरस्यैकवाच्यं
त्रीशानामैक्यरूपं त्रिभिरपि निगमैर्गीयमानस्वरूपम् ।
तिस्रोवस्था विदन्तं त्रियुगजनिजुषं त्रिक्रमाक्रान्तविश्वं
त्रैकाल्ये भेदहीनं त्रिभिरहमनिशं योगभेदैर्भजे त्वाम् ॥ **98.9** ॥

सत्यं शुद्धं विबुद्धं जयति तव वपुर्नित्यमुक्तं निरीहं
निर्द्वन्द्वं निर्विकारं निखिलगुणगणव्यञ्जनाधारभूतम् ।
निर्मूलं निर्मलं तन्निरवधिमहिमोल्लासि निर्लीनमन्त -
र्निस्सङ्गानां मुनीनां निरुपमपरमानन्दसान्द्रप्रकाशम् ॥ **98.10** ॥

दुर्वारं द्वादशारं त्रिशतपरिमिलत्षष्टिपर्वाभिवीतं
    सम्भ्राम्यत् क्रूरवेगं क्षणमनु जगदाच्छिद्य सन्धावमानम्।
चक्रं ते कालरूपं व्यथयतु न तु मां त्वत्पदैकावलम्बं
    विष्णो कारुण्यसिन्धो पवनपुरपते पाहि सर्वामयौघात्॥ **98.11** ॥

॥ इति श्रीमन्नारायणीये अष्टनवतितमं दशकं समाप्तम्॥